श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.22 - પંચમ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(વ્ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**

**એકાદશઃ સ્કન્ધઃ**

**.. અથ દ્વાવિં(મ્)શોડધ્યાયઃ ..**

**ઉદ્ધવ ઉવાચ**

**કતિ તત્ત્વાનિ વિશ્વેશ, સં(ઙ્)ખ્યાતાન્યૃષિભિઃ(ફ્) પ્રભો .**
**નવૈકાદશ પં(ઞ્)ચ ત્રીણ્-યાત્થ ત્વમિહ શુશ્રુમ .. ૧..**

**કેચિત્ ષડ્વિં(મ્)શતિં(મ્) પ્રાહુ-રપરે પં(ઞ્)ચવિં(મ્)શતિમ્ .**
**સપ્તૈકે નવ ષટ્ કેચિચ્- ચત્વાર્યેકાદશાપરે ..૨..**

કેચિત્ સપ્તદશ પ્રાહુઃ(ષ્), ષોડશૈકે ત્રયોદશ.
એતાવત્ત્વં(મ્) હિ સં(ઙ્)ખ્યાના-મૃષયો યદ્વિવક્ષયા .
ગાયન્તિ પૃથગાયુષ્મન્-નિદં(ન્) નો વક્તુમર્હસિ .. ૩..

શ્રીભગવાનુવાચ

યુક્તં(ઞ્) ચ સન્તિ સર્વત્ર, ભાષન્તે બ્રાહ્મણા યથા .
માયાં(મ્) મદીયામુદ્ગૃહ્ય, વદતાં(ઙ્) કિં(ન્) નુ દુર્ઘટમ્ .. ૪..

નૈતદેવં(ય્ઁ) યથાઽઽત્થ ત્વં(ય્ઁ), યદહં(વ્ઁ) વચ્મિ તત્તથા .
એવં(વ્ઁ) વિવદતાં(મ્) હેતું(મ્), શક્તયો મે દુરત્યયાઃ .. ૫..

યાસાં(વ્ઁ) વ્યતિકરાદાસીદ્, વિકલ્પો વદતાં(મ્) પદમ્ .
પ્રાપ્તે શમદમેઽપ્યેતિ, વાદસ્તમનુશામ્યતિ .. ૬..

પરસ્પરાનુપ્રવેશાત્ ,તત્ત્વાનાં(મ્)પુરુષર્ષભ .
પૌર્વાપર્યપ્રસં(ઙ્)ખ્યાનં(ય્ઁ), યથા વક્તુર્વિવક્ષિતમ્ .. ૭..

એકસ્મિન્નપિ દૃશ્યન્તે, પ્રવિષ્ટાનીતરાણિ ચ .
પૂર્વસ્મિન્ વા પરસ્મિન્ વા, તત્ત્વે તત્ત્વાનિ સર્વશઃ .. ૮..

પૌર્વાપર્યમતોઽમીષાં(મ્) પ્રસં(ઙ્)ખ્યાનમભીપ્સતામ્ .
યથા વિવિક્તં(ય્ઁ) યદ્વક્ત્રં(ઙ્), ગૃહ્ણીમો યુક્તિસમ્ભવાત્ .. ૯..

અનાદ્યવિદ્યાયુક્તસ્ય, પુરુષસ્યાત્મવેદનમ્ .
સ્વતો ન સમ્ભવાદન્યસ્ - તત્ત્વજ્ઞો જ્ઞાનદો ભવેત્ .. ૧૦..

પુરુષેશ્વરયોરત્ર, ન વૈલક્ષણ્યમણ્વપિ .
તદન્યકલ્પનાપાર્થા, જ્ઞાનં(ઞ્) ચ પ્રકૃતેર્ગુણઃ .. ૧૧..

પ્રકૃતિર્ગુણસામ્યં(વ્ઁ) વૈ, પ્રકૃતેર્નાત્મનો ગુણાઃ .
સત્ત્વં(મ્) રજસ્તમ ઇતિ, સ્થિત્યુત્પત્ત્યન્તહેતવઃ .. ૧૨..

સત્ત્વં(ઞ્) જ્ઞાનં(મ્) રજઃ(ખ્) કર્મ, તમોઽજ્ઞાનમિહોચ્યતે .
ગુણવ્યતિકરઃ(ખ્) કાલઃ(સ્) સ્વભાવઃ(સ્) સૂત્રમેવ ચ .. ૧૩..

પુરુષઃ(ફ્) પ્રકૃતિર્વ્યક્ત - મહં(ઙ્)કારો નભોઽનિલઃ .
જ્યોતિરાપઃ ક્ષિતિરિતિ, તત્ત્વાન્યુક્તાનિ મે નવ .. ૧૪..

શ્રોત્રં(ન્) ત્વગ્દર્શનં(ઙ્) ઘ્રાણો, જિહ્વેતિ જ્ઞાનશક્તયઃ .
વાક્પાણ્યુપસ્થપાય્વઙ્ઘ્રિઃ - કર્માણ્યં(ઙ્)ગોભયં(મ્) મનઃ .. ૧૫..

શબ્દઃ(સ્) સ્પર્શો રસો ગન્ધો, રૂપં(ઞ્) ચેત્યર્થજાતયઃ .
ગત્યુક્ત્યુત્સર્ગશિલ્પાનિ, કર્માયતનસિદ્ધયઃ .. ૧૬..

સર્ગાદૌ પ્રકૃતિર્હ્યસ્ય, કાર્યકારણરૂપિણી .
સત્ત્વાદિભિર્ગુણૈર્ધત્તે, પુરુષોઽવ્યક્ત ઈક્ષતે .. ૧૭..

વ્યક્તાદયો વિકુર્વાણા, ધાતવઃ(ફ્) પુરુષેક્ષયા .
લબ્ધવીર્યાઃ(સ્) સૃજન્ત્યણ્ડં(મ્), સં(મ્)હતાઃ(ફ્) પ્રકૃતેર્બલાત્ .. ૧૮..

સપ્તૈવ ધાતવ ઇતિ, તત્રાર્થાઃ(ફ્) પં(ઞ્)ચ ખાદયઃ .
જ્ઞાનમાત્મોભયાધારસ્ - તતો દેહેન્દ્રિયાસવઃ .. ૧૯..

ષડિત્યત્રાપિ ભૂતાનિ, પં(ઞ્)ચ ષષ્ઠઃ(ફ્) પરઃ(ફ્) પુમાન્ .
તૈર્યુક્ત આત્મસમ્ભૂતૈઃ(સ્), સૃષ્ટ્વેદં(મ્) સમુપાવિશત્ .. ૨૦..

ચત્વાર્યેવેતિ તત્રાપિ, તેજ આપોઽન્નમાત્મનઃ .
જાતાનિ તૈરિદં(ઞ્) જાતં(ઞ્), જન્માવયવિનઃ(ખ્) ખલુ .. ૨૧..

સં(ઙ્)ખ્યાને સપ્તદશકે, ભૂતમાત્રેન્દ્રિયાણિ ચ .
પં(ઞ્)ચ પં(ઞ્)ચૈકમનસ, આત્મા સપ્તદશઃ(સ્) સ્મૃતઃ .. ૨૨..

તદ્વત્ ષોડશસં(ઙ્)ખ્યાને, આત્મૈવ મન ઉચ્યતે .
ભૂતેન્દ્રિયાણિ પં(ઞ્)ચૈવ, મન આત્મા ત્રયોદશ .. ૨૩..

એકાદશત્વ આત્માસૌ, મહાભૂતેન્દ્રિયાણિ ચ .
અષ્ટૌ પ્રકૃતયશ્ચૈવ, પુરુષશ્ચ નવેત્યથ .. ૨૪..

ઇતિ નાનાપ્રસં(ઙ્)ખ્યાનં(ન્), તત્ત્વાનામૃષિભિઃ(ખ્) કૃતમ્ .
સર્વં(ન્) ન્યાય્યં(યઁ) યુક્તિમત્ત્વાદ્, વિદુષાં(ઙ્) કિમશોભનમ્ .. ૨૫..

ઉદ્ધવ ઉવાચ

પ્રકૃતિઃ(ફ્) પુરુષશ્ચોભૌ, યદ્યપ્યાત્મવિલક્ષણૌ .
અન્યોન્યાપાશ્રયાત્ કૃષ્ણ, દૃશ્યતે ન ભિદા તયોઃ .. ૨૬..

પ્રકૃતૌ લક્ષ્યતે હ્યાત્મા, પ્રકૃતિશ્ચ તથાઽઽત્મનિ .
એવં(મ્) મે પુણ્ડરીકાક્ષ, મહાન્તં(મ્) સં(મ્)શયં(મ્) હૃદિ .
છેત્તુમર્હસિ સર્વજ્ઞ, વચોભિર્નયનૈપુણૈઃ .. ૨૭..

ત્વત્તો જ્ઞાનં(મ્) હિ જીવાનાં(મ્), પ્રમોષસ્તેઽત્ર શક્તિતઃ .
ત્વમેવ હ્યાત્મમાયાયા, ગતિં(વઁ) વેત્થ ન ચાપરઃ .. ૨૮..

શ્રીભગવાનુવાચ
પ્રકૃતિઃ(ફ્) પુરુષશ્ચેતિ, વિકલ્પઃ(ફ્) પુરુષર્ષભ .
એષ વૈકારિકઃ(સ્) સર્ગો, ગુણવ્યતિકરાત્મકઃ .. ૨૯..

મમાઙ્ગ માયા ગુણમય્યનેકધા
વિકલ્પબુદ્ધીશ્ચ ગુણૈર્વિધત્તે .
વૈકારિકસ્ત્રિવિધોઽધ્યાત્મમેક-
મથાધિદૈવમધિભૂતમન્યત્ .. ૩૦..

દૃગ્ રૂપમાર્કં(વઁ) વપુરત્ર રન્ધ્રે,
પરસ્પરં(મ્) સિધ્યતિ યઃ(સ્) સ્વતઃ(ખ્) ખે .
આત્મા યદેષામપરો ય આદ્યઃ(સ્),
સ્વયાનુભૂત્યાખિલસિદ્ધસિદ્ધિઃ .
એવં(ન્) ત્વગાદિ શ્રવણાદિ ચક્ષુ-
ર્જિહ્વાદિ નાસાદિ ચ ચિત્તયુક્તમ્ .. ૩૧..

યોઽસૌ ગુણક્ષોભકૃતો વિકારઃ(ફ્)
પ્રધાનમૂલાન્મહતઃ(ફ્) પ્રસૂતઃ .
અહં(ન્) ત્રિવૃન્મોહવિકલ્પહેતુર્ –
વૈકારિકસ્તામસ ઐન્દ્રિયશ્ચ .. ૩૨..

આત્મા પરિજ્ઞાનમયો વિવાદો
હ્યસ્તીતિ નાસ્તીતિ ભિદાર્થનિષ્ઠઃ .
વ્યર્થોऽપિ નૈવોપરમેત પું(મ્)સાં(મ્)
મત્તઃ(ફ્) પરાવૃત્તધિયાં(મ્) સ્વલોકાત્ .. ૩૩..

ઉદ્ધવ ઉવાચ

ત્વત્તઃ(ફ્) પરાવૃત્તધિયઃ(સ્), સ્વકૃતૈઃ(ખ્) કર્મભિઃ(ફ્) પ્રભો .
ઉચ્ચાવચાન્ યથા દેહાન્, ગૃહ્ણન્તિ વિસૃજન્તિ ચ .. ૩૪..

તન્મમાખ્યાહિ ગોવિન્દ, દુર્વિભાવ્યમનાત્મભિઃ .
ન હ્યેતત્ પ્રાયશો લોકે, વિદ્વાં(મ્)સઃ(સ્) સન્તિ વં(ઞ્) ચિતાઃ .. ૩૫..

શ્રીભગવાનુવાચ

મનઃ(ખ્) કર્મમયં(ન્) નૃણા-મિન્દ્રિયૈઃ(ફ્) પં(ઞ્) ચભિર્યુતમ્ .
લોકાલ્લોકં(મ્) પ્રયાત્યન્ય, આત્મા તદનુવર્તતે .. ૩૬..

ધ્યાયન્ મનોऽનુ વિષયાન્, દૃષ્ટાન્ વાનુશ્રુતાનથ .
ઉદ્યત્ સીદત્ કર્મતન્ત્રં(મ્), સ્મૃતિસ્તદનુ શામ્યતિ .. ૩૭..

વિષયાભિનિવેશેન, નાત્માનં(યઁ) યત્ સ્મરેત્ પુનઃ .
જન્તોર્વૈ કસ્યચિદ્ધેતોર્- મૃત્યુરત્યન્તવિસ્મૃતિઃ .. ૩૮..

જન્મ ત્વાત્મતયા પું(મ્)સઃ(સ્), સર્વભાવેન ભૂરિદ .
વિષયસ્વીકૃતિં(મ્) પ્રાહુર્ - યથા સ્વપ્નમનોરથઃ .. ૩૯..

સ્વપ્નં(મ્) મનોરથં(ગ્) ચેત્થં(મ્), પ્રાક્તનં(ન્) ન સ્મરત્યસૌ .
તત્ર પૂર્વમિવાત્માન-મપૂર્વં(ગ્) ચાનુપશ્યતિ .. ૪૦..

ઇન્દ્રિયાયનસૃષ્ટ્યેદં(ન્), ત્રૈવિધ્યં(મ્) ભાતિ વસ્તુનિ .
બહિરન્તર્ભિદાહેતુર્- જનોઽસજ્જનકૃદ્ યથા .. ૪૧..

નિત્યદા હ્યં(ઙ્)ગ ભૂતાનિ, ભવન્તિ ન ભવન્તિ ચ .
કાલેનાલક્ષ્યવેગેન, સૂક્ષ્મત્વાત્તન્ન દૃશ્યતે .. ૪૨..

યથાર્ચિષાં(મ્) સ્રોતસાં(ગ્) ચ, ફલાનાં(વ્ઁ) વા વનસ્પતેઃ .
તથૈવ સર્વભૂતાનાં(વ્ઁ), વયોઽવસ્થાદયઃ(ખ્) કૃતાઃ .. ૪૩..

સોઽયં(ન્) દીપોઽર્ચિષાં(ય્ઁ) યદ્ - વત્સ્રોતસાં(ન્) તદિદં(ગ્) જલમ્ .
સોઽયં(મ્) પુમાનિતિ નૃણાં(મ્), મૃષા ગીર્ધીર્મૃષાયુષામ્ .. ૪૪..

મા સ્વસ્ય કર્મબીજેન, જાયતે સોઽપ્યયં(મ્) પુમાન્ .
મ્રિયતે વામરો ભ્રાન્ત્યા, યથાગ્નિર્દારુસં(ય્ઁ)યુતઃ .. ૪૫..

નિષેકગર્ભજન્માનિ, બાલ્યકૌમારયૌવનમ્ .
વયોમધ્યં(ગ્) જરા મૃત્યુ-રિત્યવસ્થાસ્તનોર્નવ .. ૪૬..

એતા મનોરથમયીર્- હ્યન્યસ્યોચ્ચાવચાસ્તનૂઃ .
ગુણસં(ઙ્)ગાદુપાદત્તે, ક્વચિત્ કશ્ચિજ્જહાતિ ચ .. ૪૭..

આત્મનઃ(ફ્) પિતૃપુત્રાભ્યા-મનુમેયૌ ભવાપ્યયૌ .
ન ભવાપ્યયવસ્તૂના-મભિજ્ઞો દ્વયલક્ષણઃ .. ૪૮..

તરોર્બીજવિપાકાભ્યાં(યઁ), યો વિદ્વાં(ઞ્)જન્મસં(યઁ)યમૌ .
તરોર્વિલક્ષણો દ્રષ્ટા, એવં(ન્) દ્રષ્ટા તનોઃ(ફ્) પૃથક્ .. ૪૯..

પ્રકૃતેરેવમાત્માન-મવિવિચ્યાબુધઃ(ફ્) પુમાન્ .
તત્ત્વેન સ્પર્શસમ્મૂઢઃ(સ્), સં(મ્)સારં(મ્) પ્રતિપદ્યતે .. ૫૦..

સત્ત્વસં(ઙ્)ગાદૃષીન્ દેવાન્, રજસાસુરમાનુષાન્ .
તમસા ભૂતતિર્યક્ત્વં(મ્), ભ્રામિતો યાતિ કર્મભિઃ .. ૫૧..

નૃત્યતો ગાયતઃ(ફ્) પશ્યન્, યથૈવાનુકરોતિ તાન્ .
એવં બુદ્ધિગુણાન્ પશ્યન્ - નનીહોડપ્યનુકાર્યતે .. ૫૨..

યથામ્ભસા પ્રચલતા, તરવોડપિ ચલા ઇવ .
ચક્ષુષા ભ્રામ્યમાણેન, દૃશ્યતે ભ્રમતીવ ભૂઃ .. ૫૩..

યથા મનોરથધિયો, વિષયાનુભવો મૃષા .
સ્વપ્નદૃષ્ટાશ્ચ દાશાર્હ, તથા સં(મ્)સાર આત્મનઃ .. ૫૪..

અર્થે હ્યવિદ્યમાનેડપિ, સં(મ્)સૃતિર્ન નિવર્તતે .
ધ્યાયતો વિષયાનસ્ય, સ્વપ્નેડનર્થાગમો યથા .. ૫૫..

તસ્માદુદ્ધવ મા ભુઙ્ક્ષ્વ, વિષયાનસદિન્દ્રિયૈઃ .
આત્માગ્રહણનિર્ભાતં(મ્) પશ્ય વૈકલ્પિકં(મ્) ભ્રમમ્ .. ૫૬..

ક્ષિપ્તોડવમાનિતોડસદ્ભિઃ(ફ્), પ્રલબ્ધોડસૂયિતોડથ વા .
તાડિતઃ(સ્) સન્નિરુદ્ધો વા, વૃત્ત્યા વા પરિહાપિતઃ .. ૫૭..

નિષ્ઠિતો મૂત્રિતો વાઙ્ગૈર્ - બહુધૈવં(મ્) પ્રકમ્પિતઃ .
શ્રેયસ્કામઃ(ખ્) કૃચ્છ્રગત, આત્મનાઽઽત્માનમુદ્ધરેત્ .. ૫૮..

ઉદ્ધવ ઉવાચ

યથૈવમનુબુધ્યેયં(વ઼્), વદ નો વદતાં(વ઼્) વર .
સુદુઃ(સ્)સહમિમં(મ્) મન્ય, આત્મન્યસદતિક્રમમ્ .. ૫૯..

વિદુષામપિ વિશ્વાત્મન્, પ્રકૃતિર્હિ બલીયસી .
ઋતે ત્વદ્ધર્મનિરતાન્, શાન્તાં(મ્)સ્તે ચરણાલયાન્ .. ૬૦..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયામેકાદશસ્કન્ધે દ્વાવિં(મ્)શોઽધ્યાયઃ .

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

